This electronic edition of the *Vajrasūcikopaniṣat*, typed for the Gauḍīya Grantha Mandira (www.granthamandira.org) by Toke Lindegaard Knudsen, is based on the following printed edition:

- *The Principal Upaniṣads*. Edited with introduction, text, translation and notes by S. Radhakrishnan. New York: Humanity Books, 1992. (First published in 1953 by George Allen & Unwin, Ltd.)

Copenhagen, Denmark
31 December 2003

# अथ वज्रसूचिकोपनिषत्

वज्रसूचिं प्रवक्ष्यामि ज्ञानम्[1] अज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥ १॥

ब्राह्मणक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णाः । तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपं स्मृतिभिरप्युक्तम् । तत्र चोद्यमस्ति । को वा ब्राहणो नाम । किं जीवः । किं देहः । किं जातिः । किं ज्ञानम् । किं कर्म । किं धार्मिक इति ॥ २॥

तत्र प्रथमो जीवो ब्राह्मण इति चेत्तन्न । अतीतानागतानेकदेहानां जीवस्यैकरूपत्वात् । एकस्यापि कर्मवशादनेकदेहसम्भवात्सर्वशरीराणां जीवस्यैकरूपत्वाच्च । तस्मान्न जीवो ब्राह्मण इति ॥ ३॥

तर्हि देहो ब्राह्मण इति चेत्तन्न । आचण्डलादि पर्यन्तानां मनुष्याणां पञ्चभौतिकत्वेन देहस्यैकरूपत्वात् । जरामरणधर्माधर्मादिसाम्यदर्शनाद्ब्राह्मणः श्वेतवर्णः क्षत्रियो रक्तवर्णः वैश्यः पीतवर्णः शूद्रः कृष्णवर्ण इति नियमाभावात् । पित्रादिदहने पुत्रादीनां ब्रह्महत्यादिदोषसम्भवाच्च । तस्मान्न देहो ब्राह्मण इति ॥ ४॥

तर्हि जातिर्ब्राह्मण इति चेत्तन्न । तत्र जात्यन्तरजन्तुष्वनेकजातिसम्भवा महर्षयो बहवः सन्त्यृष्यशृङ्गो मृग्याः कौशिकः कुशाज्जाम्बुको जम्बुकाद्वाल्मीको वल्मीकाद्व्यासः कैवर्तकन्यायां शशपृष्ठाद्गौतमो वसिष्ठ ऊर्वश्यामगस्त्यः कलशे जात इति श्रुतत्वादेतेषां जात्या विनाप्यग्रे ज्ञानप्रतिपादिता ऋषयो बहवः सन्ति । तस्मान्न जातिर्ब्राह्मण इति ॥ ५॥

तर्हि ज्ञानं ब्राह्मण इति चेत्तन्न । क्षत्रियादयो हि परमार्थदर्शनो

[1]शास्त्रमित्यन्तरपाठः

ऽभिज्ञा बहवः सन्ति । तस्मान्न ज्ञानं ब्राह्मण इति ॥ ६ ॥

तर्हि कर्म ब्राह्मण इति चेत्तन्न । सर्वेषां प्राणिनां प्रारब्धसञ्चितागामिकर्मसाधर्म्यदर्शनात् । कर्माभिप्रेरिताः सन्तो जनाः क्रियाः कुर्वन्तीति । तस्मान्न कर्म ब्राह्मण इति ॥ ७ ॥

तर्हि धार्मिको ब्राह्मण इति चेत्तन्न । क्षत्रियादयो हिरण्यदातारो बहवः सन्ति । तस्मान्न धार्मिको ब्राह्मण इति ॥ ८ ॥

तर्हि को वा ब्राह्मणो नाम । यः कश्चिदात्मानमद्वितीयं जातिगुणक्रियाहीनं षडूर्मिषड्भावेत्यादिसर्वदोषरहितं सत्यज्ञानानन्दानन्तस्वरूपं स्वयं निर्विकल्पमशेषकल्पाधारमशेषभूतान्तर्यामित्वेन वर्तमानमन्तर्बहिश्चाकाशवदनुस्यूतमखण्डानन्दस्वभावमप्रमेयमनुभवैकवेद्यमपरोक्षतयाभासमानं करतलामलकवत्साक्षादपरोक्षीकृत्य कृतार्थतया कामरागादिदोषरहितः शमादिगुणसम्पन्नो भावमात्सर्यतृष्णाशामोहादिरहितो दम्भाहंकारादिभिरसंस्पृष्टचेता वर्तते । एवमुक्तलक्षणो यः स एव ब्राह्मण इति श्रुतिस्मृतिपुराणेतिहासानामभिप्रायः । अन्यथा ब्राह्मणत्वसिद्धिर्नास्त्येव । सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेदात्मानमद्वितीयं ब्रह्म भावयेत् ॥ ९ ॥

इत्युपनिषत् ॥

फिरङ्गिणा तोकाख्येन परोपकारार्थमिदं पुस्तकं लिखितम् । श्रीरस्तु ॥